ठस्येकः । (५०/१२७०)

अङ्गस्य निमित्तं यः [1]ठः, कश्च अङ्गस्य निमित्तम्, प्रत्ययः, तस्य [2]प्रत्ययठस्य इकः इत्ययमादेशो भवति । 'प्राग्वहतेष्ठक्' (४.४.१/१५४८) – आक्षिकः । शालाकिकः । 'लवणाट् ठञ्' (४.४.५२/१५०१) लावणिकः। ठगादिषु यदि वर्णमात्रं प्रत्ययः, उच्चारणार्थोऽकारः, तदा इहापि अकार उच्चारणार्थः[3], वर्णमात्रं तु स्थानित्वेनोपादीयते । सङ्घातग्रहणे [4]तु प्रत्ययेऽत्रापि सङ्घातग्रहणमेव । तत्र 'कणेष्ठः' (उ. १०८) कण्ठः इत्येवमादीनामुणादीनाम् 'उणादयो बहुलम्' (३.३.१/३१६९) इति [5]न भवति । मथितं पण्यमस्य माथितिकः (म. भा. ३. ३२८) इत्यत्र तु 'यस्येति च' (६.४.१४८/३११) इति लोपे कृते 'इसुसुक्तान्तात् कः' (७.३.५१/१२२१) इति स्थानिवद्भावादिकस्य कादेशः प्राप्नोति, 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या. प. १२) इति न भवति । यस्येति च इति लोपस्य स्थानिवद्भावाद्वा । पूर्वस्मादपि हि विधौ स्थानिवद्भावः ॥

इसुसुक्तान्तात् कः । (५१/१२२१)

इस् उस् इत्येवमन्तानाम् उगन्तानां तान्तानां चाङ्गानामुत्तरस्य ठस्य कः इत्ययमादेशो भवति । इस् – सार्पिष्कः[6] । उस् – धानुष्कः । याजुष्कः । उक् – [7]नैषादकर्षुकः । शाबरजम्बुकः । [8]मातृकम् । पैतृकम् । तान्तात् – औदश्वित्कः । शाकृत्कः । [9]याकृत्कः । इसुसोः प्रतिपदोक्तयोर्ग्रहणादिह न भवति, आशिषा चरति आशिषिकः । उषा चरति औषिकः ।

[८६०] दोष उपसङ्ख्यानम् ।

दोर्भ्यां तरति दौष्कः ॥

चजोः कु घिण्ण्यतोः । (५२/२८६३)

चकारजकारयोः कवर्गादेशो भवति घिति ण्यति च प्रत्यये परतः । घिति – पाकः । त्यागः । रागः । ण्यति – पाक्यम् । वाक्यम् । [10]रेक्यम्[11] ॥

न्यङ्क्वादीनां च । (५३/२८६४)

न्यङ्कु इत्येवमादीनां [12]कवर्गादेशो भवति । न्यङ्कुः – 'नावञ्चेः' (उ. १७) इति [13]उप्रत्ययः[14] । मद्गुः – मिमस्जिभ्य उः (उ. ७) इति मस्जेः उप्रत्ययः । भृगुः – 'प्रथिमदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उ. २८) इति उप्रत्ययः । दूरेपाकः, फलेपाकः – दूरे पच्यते स्वयमेव, फले पच्यते स्वयमेव । पचाद्यच् (३.१.१३४/२८९६) । निपातनाद् वृद्धिः । 'तत्पुरुषे कृति बहुलम्' (६.३.१४/९७२) इति [15]सप्तम्या अलुक् । क्षणेपाकः इत्यपि हि केचित् पठन्ति । दूरेपाका, फलेपाका इति [16]टाबन्तमपरेऽधीयते । उकारान्तावपरे

---

1. ठकारः क. 2. ठस्य क. ह. 3. एव इत्यधिकम् क. इ. 4. हि क. 5. बहुलवचनात् इत्यधिकम् क. 6. बार्हिष्कः इत्यधिकम् क. इ. 7. नैषाहकर्षुकः इ. 8. मातृकः पैतृकः इ. 9. याकृत्कः नास्ति ह. 10. रेक्यम् नास्ति क. इ. 11. यथासङ्ख्यम् अत्र न भवति तेन रक्तं रागात् इति लिङ्गात् इत्यधिकम् इ. ड. 12. च इत्यधिकम् क. 13. उक् प्रत्ययः ह. 14. न्यङ्कुः मृगजातिः इत्यधिकम् क. 15. सप्तम्या अलुक् नास्ति इ. 16. टाबन्तौ इ.